# 49 - एकोनपञ्चाश दशकम्
# वृन्दावन प्रवेशम्

भवत् प्रभावा विदुरा हि गोपा: तरु प्रपा तादिक मत्र गोष्ठे ।
अहेतु मुत्पात गणं विशङ्क्य प्रयातु मन्यत्र मनो वितेनु: ॥ ॥49-1॥

तत्रो पनन्दाभिध गोप वर्यो जगौ भवत् प्रेरण यैव नूनम् ।
इत: प्रतीच्यां विपिनं मनोज्ञं वृन्दावनं नाम विराजतीति ॥ ॥49-2॥

बृहद् वनं तत् खलु नन्द मुख्या: विधाय गौष्ठीन मथ क्षणेन ।
त्वदन्वित त्वज् जननी निविष्ट गरिष्ठ यानानुगता विचेलु:॥ ॥49-3॥

अनो मनोज्ञ ध्वनि धेनु पाली खुर प्रणा दान्तरतो वधूभि: ।
भवत् विनोदालपि ताक्षराणि प्रपीय नाज्ञायत मार्ग दैर्घ्यम् ॥ ॥49-4॥

निरीक्ष्य वृन्दावन मीश नन्दत् प्रसून कुन्द प्रमुख द्रुमौघम् ।
अमोदथाश् शाद्वल सान्द्र लक्ष्म्या हरिन्मणी कुट्टिम पुष्ट शोभम् ॥49-5॥

नवाक निर्व्यूढ निवास भेदेषु अशेष गोपेषु सुखासि तेषु ।
वनश्रियं गोप किशोर पाली विमिश्रित: पर्य गलोकथास् त्वं ॥॥49-6॥

अराल मार्गा गत निर्मलापां मराल कूजाकृत नर्म लापाम् ।
निरन्तर स्मेर सरोज वक्त्रां कलिन्द कन्यां समलोकयस् त्वं ॥॥49-7॥

मयूर केका शत लोभनीयं मयूख माला शबलं मणीनाम् ।
विरिञ्च लोक स्पृश मुच्च शृङ्गै: गिरिञ्च गोवर्धन मैक्षथास् त्वं ॥ ॥49-8॥

समं ततो गोप कुमारकैस् त्वं समन्ततो यत्र वनान्त मागा: ।
ततस् ततस्तां कुटिला मपश्य: कलिन्दजां रागवती मिवैकाम् ॥॥49-9॥

तथा विधेऽस्मिन् विपिने पशव्ये समुत्सुको वत्सगण प्रचारे ।
चरन् सरामोऽथ कुमारकैस् त्वं समीर गेहाधिप पाहि रोगात् ॥ ॥49-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥